# আনন্দলহরী

{॥ আনন্দলহরী ॥}

ভবানি স্তোতুং ত্বাং প্রভবতি চতুর্ভির্ন বদনৈঃ

প্রজানামীশানস্ত্রিপুরমথনঃ পঞ্চভিরপি ।

ন ষড্ভিঃ সেনানীর্দশশতমুখৈরপ্যহিপতিঃ

তদান্যেষাং কেষাং কথয় কথমস্মিন্নবসরঃ ॥ ১॥

ঘৃতক্ষীরদ্রাক্ষামধুমধুরিমা কৈরপি পদৈঃ

বিশিষ্যানাখ্যেয়ো ভবতি রসনামাত্র বিষয়ঃ ।

তথা তে সৌন্দর্যং পরমশিবদৃঙ্মাত্রবিষয়ঃ

কথংকারং ব্রূমঃ সকলনিগমাগোচরগুণে ॥ ২॥

মুখে তে তাম্বূলং নয়নযুগলে কজ্জলকলা

ললাটে কাশ্মীরং বিলসতি গলে মৌক্তিকলতা ।

স্ফুরৎকাঞ্চী শাটী পৃথুকটিতটে হাটকময়ী

ভজামি ত্বাং গৌরীং নগপতিকিশোরীমবিরতম্ ॥ ৩॥

বিরাজন্মন্দারদ্রুমকুসুমহারস্তনতটী

নদদ্বীণানাদশ্রবণবিলসৎকুণ্ডলগুণা

নতাঙ্গী মাতঙ্গী রুচিরগতিভঙ্গী ভগবতী

সতী শম্ভোরম্ভোরুহচটুলচক্ষুর্বিজয়তে ॥ ৪॥

নবীনার্কভ্রাজন্মণিকনকভূষণপরিকরৈঃ

বৃতাঙ্গী সারঙ্গীরুচিরনয়নাঙ্গীকৃতশিবা ।

তড়িৎপীতা পীতাম্বরললিতমঞ্জীরসুভগা

মমাপর্ণা পূর্ণা নিরবধিসুখৈরস্তু সুমুখী ॥ ৫॥

হিমাদ্রেঃ সংভূতা সুললিতকরৈঃ পল্লবযুতা

সুপুষ্পা মুক্তাভির্ভ্রমরকলিতা চালকভরৈঃ ।

কৃতস্থাণুস্থানা কুচফলনতা সূক্তিসরসা

রুজাং হন্ত্রী গন্ত্রী বিলসতি চিদানন্দলতিকা ॥ ৬॥

সপর্ণামাকীর্ণাং কতিপযগুণৈঃ সাদরমিহ

শ্রযন্ত্যন্যে বল্লীং মম তু মতিরেবং বিলসতি ।

অপর্ণৈকা সেব্যা জগতি সকলৈর্যৎপরিবৃতঃ

পুরাণোঽপি স্থাণুঃ ফলতি কিল কৈবল্যপদবীম্ ॥ ৭॥

বিধাত্রী ধর্মাণাং ত্বমসি সকলাম্নাযজননী

ত্বমর্থানাং মূলং ধনদনমনীযাংঘ্রিকমলে ।

ত্বমাদিঃ কামানাং জননি কৃতকন্দর্পবিজযে

সতাং মুক্তের্বীজং ত্বমসি পরমব্রহ্মমহিষী ॥ ৮॥

প্রভূতা ভক্তিস্তে যদপি ন মমালোলমনসঃ

ত্বযা তু শ্রীমত্যা সদযমবলোক্যোঽহমধুনা ।

পযোদঃ পানীযং দিশতি মধুরং চাতকমুখে

ভৃশং শঙ্কে কৈর্বা বিধিভিরনুনীতা মম মতিঃ ॥ ৯॥

কৃপাপাঙ্গালোকং বিতর তরসা সাধুচরিতে

ন তে যুক্তোপেক্ষা মযি শরণদীক্ষামুপগতে ।

ন চেদিষ্টং দদ্যাদনুপদমহো কল্পলতিকা

বিশেষঃ সামান্যৈঃ কথমিতরবল্লীপরিকরৈঃ ॥ ১০॥

মহান্তং বিশ্বাসং তব চরণপঙ্কেরুহযুগে

নিধাযান্যন্নৈবাশ্রিতমিহ মযা দৈবতমুমে ।

তথাপি ত্বচ্চেতো যদি মযি ন জাযেত সদযং

নিরালম্বো লম্বোদরজননি কং যামি শরণম্ ॥ ১১॥

অযঃ স্পর্শে লগ্নং সপদি লভতে হেমপদবীং

যথা রথ্যাপাথঃ শুচি ভবতি গংগৌঘমিলিতম্ ।

তথা তত্তৎপাপৈরতিমলিনমন্তর্মম যদি

ত্বযি প্রেম্ণাসক্তং কথমিব ন জাযেত বিমলম্ ॥ ১২॥

ত্বদন্যস্মাদিচ্ছাবিষযফললাভে ন নিযমঃ

ত্বমর্থানামিচ্ছাধিকমপি সমর্থা বিতরণে ।

ইতি প্রাহুঃ প্রাঞ্চঃ কমলভবনাদ্যাস্ত্বযি মনঃ

ত্বদাসক্তং নক্তং দিবমুচিতমীশানি কুরু তত্ ॥ ১৩॥

স্ফুরন্নানারত্নস্ফটিকমযভিত্তিপ্রতিফল

ত্ত্বদাকারং চঞ্চচ্ছশধরকলাসৌধশিখরম্ ।

মুকুন্দব্রহ্মেন্দ্রপ্রভৃতিপরিবারং বিজযতে

তবাগারং রম্যং ত্রিভুবনমহারাজগৃহিণি ॥ ১৪ ॥

নিবাসঃ কৈলাসে বিধিশতমখাদ্যাঃ স্তুতিকরাঃ

কুটুম্বং ত্রৈলোক্যং কৃতকরপুটঃ সিদ্ধিনিকরঃ ।

মহেশঃ প্রাণেশস্তদবনিধরাধীশতনযে

ন তে সৌভাগ্যস্য ক্বচিদপি মনাগস্তি তুলনা ॥ ১৫॥

বৃষো বৃদ্ধো যানং বিষমশনমাশা নিবসনং

শ্মশানং ক্রীডাভূর্ভুজগনিবহো ভূষণবিধিঃ

সমগ্রা সামগ্রী জগতি বিদিতৈব স্মররিপোঃ

যদেতস্যৈশ্বর্যং তব জননি সৌভাগ্যমহিমা ॥ ১৬॥

অশেষব্রহ্মাণ্ডপ্রলযবিধিনৈসর্গিকমতিঃ

শ্মশানেষ্বাসীনঃ কৃতভসিতলেপঃ পশুপতিঃ ।

দধৌ কণ্ঠে হালাহলমখিলভূগোলকৃপযা

ভবত্যাঃ সংগত্যাঃ ফলমিতি চ কল্যাণি কলযে ॥ ১৭॥

ত্বদীযং সৌন্দর্যং নিরতিশযমালোক্য পরযা

ভিযৈবাসীদ্গংগা জলমযতনুঃ শৈলতনযে ।

তদেতস্যাস্তস্মাদ্বদনকমলং বীক্ষ্য কৃপযা

প্রতিষ্ঠামাতন্বন্নিজশিরসিবাসেন গিরিশঃ ॥ ১৮॥

বিশালশ্রীখণ্ডদ্রবমৃগমদাকীর্ণঘুসৃণ

প্রসূনব্যামিশ্রং ভগবতি তবাভ্যঙ্গসলিলম্ ।

সমাদায স্রষ্টা চলিতপদপাংসূন্নিজকরৈঃ

সমাধত্তে সৃষ্টিং বিবুধপুরপঙ্কেরুহদৃশাম্ ॥ ১৯॥

বসন্তে সানন্দে কুসুমিতলতাভিঃ পরিবৃতে

স্ফুরন্নানাপদ্মে সরসি কলহংসালিসুভগে ।

সখীভিঃ খেলন্তীং মলযপবনান্দোলিতজলে

স্মরেদ্যস্ত্বাং তস্য জ্বরজনিতপীডাপসরতি ॥ ২০॥

॥ ইতি শ্রীমচ্ছঙ্করাচার্যবিরচিতা আনন্দলহরী সম্পূর্ণা ॥

Encoded by S.V.Ganesan (deepa at tiac.net) and

P. P. Narayanaswami (swami at math.mun.ca)

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Ananda Lahari Lyrics in Bengali PDF
% File name : aanandal.itx
% Category : laharI
% Location : doc_devii
% Author : Shankaracharya
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : S.V.Ganesan and P. P. Narayanaswami (swami at math.mun.ca)
% Proofread by : S.V.Ganesan and P. P. Narayanaswami (swami at math.mun.ca)
% Latest update : October 1, 2010
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website